# Department :- Ayurved Samhita & Siddhant




Topic :- तन्त्रयुक्ति

- चरक संहिता सिद्धिस्थान - अध्याय 12
- सुश्रुत संहिता उत्तरतंत्र - अध्याय 65
- अष्टांग संग्रह उत्तरतंत्र - अध्याय 50
- अष्टांग हृदय उत्तरतंत्र - अध्याय 40

**तन्त्रयुक्ति = तन्त्र + युक्ति**

1. तन्त्र = **त्रायते शरीरमनेनेति तन्त्रं |**
   **(निबन्ध संग्रह ,सु०उ०65/2)**
2. युक्ति = **युक्तिश्च योजना या तु युज्यते|**
   **(च०सू०26/31)**

❖ **तस्य युक्तयो योजनास्तन्त्रयुक्तयः|**
**(निबन्ध संग्रह ,सु०उ०65/2)**

# तन्त्रयुक्ति का प्रयोजन

वाक्ययोजनमर्थयोजनं च |

**(सु०उ०65/4)**

असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् |
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः|| **(सु०उ०65/5)**

व्यक्तानोक्तास्तु ये ह्यार्था लीना ये चाप्यनिर्मलाः |
लेशोक्ता ये च केचित्स्युस्तेषां चापि प्रसाधनम् ||
**(सु०उ०65/6)**

# तन्त्रयुक्ति का उपयोगिता



यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा||४६||
प्रबोधनप्रकाशार्थास्तथा तन्त्रस्य युक्तयः||
**(च०सि०12/46,47) (सु०उ०65/7)**

- **एक शास्त्र के ज्ञान से अन्य शास्त्र का ज्ञान :-**

एकस्मिन्नपि यस्येह शास्त्रे लब्धास्पदा मतिः|
स शास्त्रमन्यदप्याशु युक्तिज्ञत्वात् प्रबुध्यते| **(च०सि०12/47)**

- **तन्त्रयुक्ति के विना तन्त्र ज्ञान वृथा:-**

अधीयानोऽपि शास्त्राणि तन्त्रयुक्त्या विना भिषक्|
नाधिगच्छति शास्त्रार्थानर्थान् भाग्यक्षये यथा||
**(च०सि०12/48)**

# तंत्रयुक्तियो की संख्या

❖**चरक एवम् वाग्भट -36**

तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च||
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम्|
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः||
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः|
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः||
अतीतानागतावेक्षास्वसञ्ज्ञोह्यसमुच्चयाः|
निदर्शनं निर्वचनं सन्नियोगो विकल्पनम्|
प्रत्युत्सारस्तथोद्धारः सम्भवस्तन्त्रयुक्तयः|

**च०सि०12/41-45**

❖**सुश्रुत + कौ०अर्थशास्त्र = 32**

36- प्रत्युत्सार, प्रयोजन ,उद्धार ,संभव

❖**भट्टार हरिश्चंद्र =40**

36+ व्याकरण, परिप्रश्न ,व्युत्क्रंताभिधान ,हेतु

❖**भाव प्रकाश = 42**

# 1. अधिकरण

- ❖ अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्ता; |
  - ➢ **यथा-**"विघ्नभूता यदा रोगा"|

**(च०सू०1/6)**

- ➢ प्रथमं जायते ह्योजः शरीरेऽस्मिञ्छरीरिणाम्|
  सर्पिर्वर्णं मधुरसं लाजगन्धि प्रजायते||

**(च०सू०17/74)**

- ❖ तत्र यमर्थमधिकृत्योच्यते तदधिकरणं; यथा रसं दोषं वा|

**(सु०उ०65/8)**

- ❖ यदधिकृत्य प्रवर्तते शास्त्रं स्थानमध्यायः प्रकरणं वाक्यं वा|

**(अ०हृ०उ०40)**

# 2.योग

❖ योगो नाम योजना व्यस्तानां पदानामेकीकरणम्।

- **यथा- प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि** ।
- **प्रतिज्ञाः-** मातृजश्चायं गर्भ ।
- **हेतुः-** मातरमन्तरेण गर्भानुपपत्ते ।
- **दृष्टान्त/उदाहरण :-** कूटागार ।
- **उपनयः-** यथा नानाद्रव्यसमुदायात् कूटागारस्तथा गर्भनिर्वर्तनं ।
- **निगमनः-** तस्मान्मातृजश्चायमित्येषां प्रतिज्ञायोगः।

- सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः|
यथावदचिरात् सर्वं बुबुधे तन्मना मुनिः||
**(च०सू०1/25)**

- अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः|
शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया||
**(च०सू०1/30)**

- तैलं पिबेच्चामृतवल्लिनिम्बहिंस्राभयावृक्षकपिप्पलीभिः |
सिद्धं बलाभ्यां च सदेवदारु हिताय नित्यं गलगण्डरोगे’|
**(सु०उ०65/9)**

# 3.हेत्वर्थ

❖हेत्वर्थो नामयदन्यत्राभिहितमन्यत्रोपपद्यते;|

➢यथा-समानगुणाभ्यासो हि धातूनां वृद्धिकारणम्” |

**(च०सू०12/5)**

➢सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्|
ह्रासहेतुर्विशेषश्च ||

**(च०सू०1/44)**

❖यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः |

➢यथा- मृत्पिण्डोऽद्भिः प्रक्लिद्यते तथा माषदुग्ध
प्रभृतिभिर्व्रणः प्रक्लिद्यत इति |

# 4.पदस्य च अर्थ (पदार्थ)

❖पदार्थो नाम पदस्य पदयोः पदानां वाऽर्थः पदार्थः|

➢यथा-आयुषो वेद' |

➢द्रव्यमितिपदेन खादयश्चेतनाषष्ठा उच्यन्ते;|

❖योऽर्थोऽभिहितः सूत्रे पदे वा|

➢यथा-स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणां वाऽर्थाना उपपत्तिर्दृश्यते,| (सु०उ०65/10)

➢सैन्धव

❖पदार्थो नाम,-पदेनार्थो गम्यते|

➢यथा- द्रव्यमिति पदम्, तस्यार्थो भूजलादिः|

➢गुण इति पदम्, तस्यार्थो गुर्वादिः|

# 5.प्रदेश

❖प्रदेशो नाम यद्बहुत्वादर्थस्य कात्स्न्येंनाभिधातुम शक्यमेकदेशेनाभिधीयते ।

➢यथा-"अनुपानैकदेशोऽयमुक्तः प्रायोपयोगिकः'।

**(च.सू.27/329)**

❖प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः ।

➢यथा- देवदत्तस्यानेन शल्यमुद्धृतं तथा यज्ञदत्तस्याप्ययमुद्धरिष्यतीति ।

**(सु०उ०65/16)**

# 6.उद्देश

❖उद्देशो नाम सङ्क्षेपाभिधानं;|

➢ यथा- “हेतुलिङ्गौषधज्ञानं”| (च०सू०1/24)

➢ सार्था गुर्वादयो बुद्धिःप्रयत्नान्ताःपरादयः|(च०सू०1/49)

➢ चतुष्पाद

➢ षड उपक्रम

❖समासवचनमुद्देशः |

➢ यथा- शल्यमिति || (सु०उ०65/12)

❖उद्देशो नाम,-सङ्क्षेपाभिधानम्|

➢ यथा-वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः|

(अ०हृ०सू०1/16)

# 7.निर्देश

❖ निर्देशो नाम सङ्ख्येयोक्तस्य विवरणं;|

➢ यथा- हेतुलिङ्गौषधस्य पुनः प्रपञ्चनं | (च०सू०1/24)

➢ “इत्युक्तं कारणं”| (च०सू०1/53)

❖ विस्तरवचनं निर्देशः |

➢ यथा- शारीरमागन्तुकं चेति ||(सु०उ०65/13)

❖ निर्देशो नाम,-तस्यैव विस्तारोक्तिः|

➢ "तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः|

(अ०हृ०सू०1/11)

# 8.वाक्यशेष

❖ वाक्यशेषो नाम यल्लाघवार्थमाचार्येण वाक्येषु पदमकृतं गम्यमानतया पूर्यते |

➢ यथा “प्रवृत्तिर्हेतुभावानां” इत्यत्र ‘अस्ति’पूर्यते| **(च०सू०16/28)**

➢ “जाङ्गलजै रसैः” इत्यत्र मांसशब्दः पूर्यते|**(च०सि०1/9)**

➢ मानसः पुनरुद्दिष्टो रजश्च तम एव च| इत्यत्र दोष पूर्यते | **(च०सू०1/57)**

➢ रात्रिस्वभावप्रभवा मता या तां भूतधात्रीं प्रवदन्ति तज्ज्ञाः| इत्यत्र निद्रा पूर्यते | **(च०सू०21/59)**

❖ येन पदेनानुक्तेन वाक्यं समाप्येत स वाक्यशेषः |

➢ यथा- शिरः पाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणं विनाऽपि गम्यते पुरुषस्येति |**(सु०उ०65/19)**

# 9.प्रयोजन

❖प्रयोजनं नाम यदर्थं काममयमानः प्रवर्तते |

➢यथा- "धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्"| **(च०सू०1/53)**

➢प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनं च|

**(च०सू०30/26)**

# 10.उपदेश

❖ उपदेशो नामाप्तानुशासनं|

➢ यथा- “स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरम्”| (च०सू०13/99)

➢ न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम्|
नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना||

(च०सू०7/61)

➢ रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्|
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत्| (च०सू०20/20)

❖ एवमित्युपदेशः |

➢ यथा- तथा न जागृयाद्रात्रौ दिवास्वप्नं च वर्जयेत्’ इति||

(सु०उ०65/14)

# 11.अपदेश

❖ अपदेशो नाम यत्प्रतिज्ञातार्थसाधनाय हेतुवचनं |

➢ यथा- "वाताज्जलं जलाद्देशं देशात् कालं स्वभावतः|
विद्याद्दुष्परिहार्यत्वात्"इत्यादि, तत्र प्रतिज्ञातार्थस्य हेतुवचनं-
दुष्परिहार्यत्वादिति|

**(च०वि०3/20)**

➢ सर्पिस्तैलं वसा मज्जा सर्वस्नेहोत्तमा मताः|
एषु चैवोत्तमं सर्पिः संस्कारस्यानुवर्तनात्||

**(च०सू०13/3)**

➢ बसंत मे उद्वर्तन करते है |

❖ अनेन कारणेनेत्यपदेशः,|

➢ यथाऽपदिश्यते- मधुरः श्लेष्माणमभिवर्धयतीति||
**(सु०उ०65/15)**

# 12.अतिदेश

❖ अतिदेशो नाम यत्किञ्चिदेव प्रकाश्यार्थमनुक्तार्थ साधनायैव एवमन्यदपि प्रत्येतव्यमिति परिभाष्यते |

➢ यथा- "यच्चान्यदपि किञ्चित् स्यादनुक्तमिह पूजितम्| वृतं तदपि चात्रेयः सदैवाभ्यनुमन्यते" **(च०सू०8/34)**

➢ विकारनामाकुशलो न जिह्रीयात् कदाचन|
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः||
**(च०सू०18/44-47)**

❖ प्रकृतस्यानागतस्य साधनमतिदेशः |

➢ यथा-यतोऽस्य वायुरुर्ध्वमुत्तिष्ठते तेनोदावर्ती स्यादिति||
**(सु०उ०65/17)**

➢ यथा-श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः|
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु |**(सु०उ०39/25,26)**

# 13.अर्थापत्ति

- अर्थापत्तिर्नाम यदकिर्तितमर्थादापद्यते साऽर्थापत्ति |
  - यथा- न नक्तं दधि भुञ्जीत, अर्थाद्दिवा भुञ्जीतेत्यापद्यते| **(च०सू०8/20)**
  - नानृतं ब्रूयात् | **(च०सू०8/19)**
  - न कुर्यात् पापं | **(च०सू०8/19)**
  - न चातिब्रूयात् | **(च०सू०8/34)**
- यदकीर्तितमर्थादापद्यते साऽर्थापत्तिः |
  - यथा- ओदनं भोक्ष्ये इत्युक्तेऽर्थादापन्नं भवति- नायं पिपासुर्यवागूमिति ||**(सु०उ०65/20)**

# 14.निर्णय

❖ निर्णयो नाम विचारितस्यार्थस्य व्यवस्थापनं;|

➢ यथा- चतुष्पदभेषजत्वादि विचारंकृत्वाऽभिधीयते- “यदुक्तं षोडशकलं पूर्वाध्याये भेषजं तद्युक्तियुक्तमलमारोग्याय”|

**(च॰सू॰10/3)**

➢ षडेव रसा इत्युवाच भगवानात्रेयः पुनर्वसुः|

**(च॰सू॰26/9)**

➢ यथा- शरीरं प्रपीड्य पश्चादधो गत्वा वसामेदोमज्जानुविद्धं मूत्रं विसृजति वातः एवमसाध्या वातजा इति | तथा चोक्तम्- कृत्स्नं शरीरं निष्पीड्य मेदोमज्जावसायुतः | अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः |

**(सु॰उ॰65/26,27)**

# 15.प्रसंग

❖ प्रसङ्गो नाम पूर्वाभिहितस्यार्थस्य प्रकरणागतत्वादिना पुनरभिधानं ।

- यथा- “तत्रातिप्रभावतां दृश्यानातिमात्रदर्शनमतियोगः” एवमाद्यभिधाय,।
  **(च०सू०11/37)**
- पुनः “अत्युग्रशब्दश्रवणाच्छ्रवणात् सर्वशो न च” इत्यादिना पूर्वोक्त एवार्थोऽभिधीयते। **(च०शा०1/118)**

व्याधि त्रिविध हेतु-

- कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च।
  **(च०सू०1/54)**
- प्रेरणमसात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः,परिणामश्चेति।।

➢असात्म्येन्द्रियार्थसंयोगःप्रज्ञापराध परिणामश्चेति|
**(च॰नि॰1/3)**

➢प्रज्ञापराधो विषमास्तथाऽर्था हेतुस्तृतीयः परिणामकालः|
**(च॰शा॰2/40)**

**ज्वर का निदान-निदान 1**

**चिकित्सा 3** -निदाने कारणान्यष्टौ पूर्वोक्तानि विभागशः|
**(च॰चि॰3/27)**

❖प्रकरणान्तरेण समापनं प्रसङ्गः, यद्वा प्रकरणान्तरितो योऽर्थोऽसकृदुक्तःसमाप्यते स प्रसङ्गः | **(सु॰उ॰65/22)**

➢यथा- पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते|
**(सु॰सू॰1/22)**

➢यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुषःइति, स खल्वेष कर्मपुरुषश्चिकित्साधिकृत इति| **(सु॰शा॰1/16)**



# धन्यवाद